| | | |
|---|---|---|
| First 2. | 1 2 1 2 1 2<br>आद्यमादिममन्त्यं स्यादन्तिमं चाग्र्यमग्रिमम् । | Last 2; prior 2. |
| Middle 2. | 1 2 1<br>मध्यमं मध्यमीयं च मध्यन्दिनमुदाहृतम् ॥७७५॥ | Midday, noon. |
| Adoration, reverance 2. | 1 2 1 a 2<br>नमस्या वन्दना प्रोक्ता तपस्या नियमस्थितिः । | Steady observance of religion 2. |
| Renunciation of the world; ascetic devotion; religious austerity 2. | 1 2 1 b 2 3<br>परिव्रज्या व्रतादानं व्रज्याऽट्या च गतिः स्मृता ॥७७६॥ | Walking, or the habit of roaming as a religious mendicant 2 |
| Empty 2. | 1 2 1 2 c 1 2<br>रिक्तं तुच्छमसारं तु फल्गु व्युष्टिः फलं स्मृतम् । | Vain 2. Result, product 2. |
| Inaccesisble 2. | 1 2 1 2<br>कलिलं गहनं प्रोक्तं श्लथं शिथिलमुच्यते ॥७७७॥ | Loose, lax 2. |
| Independence of action 2. | 1 2 1 2<br>स्वतन्त्रवृत्तिर्व्युत्थानमभ्युत्थानं च गौरवम् । | Dignity, respect 2. |
| Disposition 2. | 1 2 1 2<br>संस्थानं संनिवेशः स्यादास्थानं नृपतेः सभा ॥७७८॥ | A royal waiting room 2. |
| Conversation 2. | 1 2 1 2<br>सङ्कथान्योन्यसङ्गीतिः प्रतिपत्तिः प्रगल्भता । | Decision 2. |
| Effort 2. | 1 2 d 1 2<br>उच्यत ऊर्जं उत्साहो भृकुटिर्भ्रुकुटिस्तथा ॥७७९॥ | Frown 2. |
| Disunion 2. | 1 2 1 2<br>उपजापो भवेद्भेदः साम सान्त्वमिति स्मृतम् । | Conciliation 2. |
| Trust, confidence2. | 1 2 1 2<br>तथेति प्रत्ययः श्रद्धा संस्कारो वासना स्मृता ॥७८०॥ | The realising of past perception 2. |
| Got, obtained. | 1 2 e 1<br>स्मृतमास्थितमाक्रान्तं प्रतीष्टं पतदाहृतम् । | Accepted, received. |
| Covered 2. | 1 2 1 2<br>प्रच्छादितं स्यात्संवीतं प्रशस्तं संस्कृतं स्मृतम् ॥७८१॥ | Excellent 2. |
| Snare, a trap 2. | 1 2 f 1 2<br>उन्माथः कूटयन्त्रं स्यादवपातोऽवटः स्मृतः । | A hole or cavity 2. |
| Nature 3. | 1 2 3 g 1 2<br>धर्मः स्वभावः आत्मा स्यादवेक्षा प्रतिजागरः ॥७८२॥ | Attention, watchfulness 2. |
| Unkind, harsh 2. | 1 2 h 1<br>स्मृतं परुषमस्निग्धमाचारातिक्रमः क्रिया । | Areligious rite. |
| Quick,expeditious2. | 1 2 1 i 2<br>उच्चण्डमप्रलम्बं स्यान्माढिः पत्रशिरा स्मृता ॥७८३॥ | The vein of a leaf 2. |

a नियमः स्थितिः b व्रज्याद्या, मीज्याज्या c व्युष्टचुफलं, व्युष्टिफल, व्युष्टफलं d भ्रुकुटिर्भ्रूकुटि, उत्साहो भ्रुकुटि, भृकुटिर्भ्रंकूटि e प्रतिष्ठं तु पदाध्रुतं, प्रतिष्टं तु यदाध्रुतं, प्रतीष्टं पतदाद्रुतं f स्यादवतापो, स्यादवपानो, स्यादवढः स्मृतः g स्यादपेक्षा, स्यादचेक्षा h माचारोतिक्रमः, मावारातिः कमक्षया i पत्रशरा ।